**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN: 2581-6241 Volume - 4, Issue - 1, Jan – 2021
Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 3.589
Received on : 13/01/2021 Accepted on : 26/01/2021 Publication Date: 31/01/2021

# न्यायत्रिसूत्र्यां समासप्रत्ययार्थघटितसिद्धान्ताः

**अभीपालः**

गवेषकः (PhD), संस्कृतविभागः, रामकृष्णमिशन्-विद्यामन्दिरम्

बेलुडमठः, हावडा, पश्चिमवङ्गः – ७११२०२

Email – avipalantpur18@gmail.com

**शोधसारः** मोक्षस्य प्राप्तिनिमित्तं यानि शास्त्राणि विरचितानि तान्येव मोक्षशास्त्राणि दर्शनशास्त्राणि वोच्यन्ते। दर्शनशास्त्रेषु आन्यतम्यमेति न्यायदर्शनम्। गौतमप्रणीतस्य न्यायदर्शनस्यादितः सूत्रत्रयं संक्षेपेण त्रिसूत्री इत्युच्यते। अस्मिन् त्रिसूत्रीमध्ये सूक्ष्मातिसूक्ष्मधीगोचरसिद्धान्ता महर्षिभिः उपनिबद्धाः। सिद्धान्तप्रतिपादनसमये च सिद्धान्तप्रतिपादनोपयोगीनि प्रत्यययुतपदसमुच्चयरूपाणि समासबद्धानि च बहूनि वाक्यानि तैः व्यवहृतानि। परन्तु न्यायत्रिसूत्रीमध्ये भाष्यमध्ये च सिद्धान्तप्रतिपादनसमये समासाः प्रत्ययाश्च कथमुपकुर्वन्ति, कथं च तेषामुपयोगः कृतो दार्शनिकैः इत्येतेषामालोचनमत्र यथामति विहितम्। तथाहि आदिमे सूत्रे द्वन्द्वसमासः कथं करणीय इति प्रदर्शितम्। अन्येषां च पदानां व्याकरणसम्मता व्युत्पत्तिः प्रदर्शिता, अन्यथाकरणे च दोषोऽपि दर्शितः। कतिपयभाष्यस्थपदस्यापि प्रकृतिप्रत्ययविभागादिपूर्वकं सिद्धान्ताः प्रतिपादिताः। ‘दुःखजन्मप्रवत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्ग’ इति द्वितीयन्यायसूत्रे तदनन्तरापायदित्यत्र पञ्चम्याः कस्तावदर्थो ग्रहणीय इति विचारितम्। एवं तृतीयसूत्रेऽपि प्रत्येकं पदस्य यथोचितं व्युत्पत्तिपूर्वकं सूत्रसरलार्थो यथामति प्रपञ्चितः।

**कुञ्चीशब्दाः -** अपवर्गः, प्रत्ययार्थः, समासार्थः, न्यायसूत्रम्।

## १ भूमिका :

दृश्यतेऽस्मिन् संसारेऽसारे मनुजनूनां पुरुषार्थप्राप्त्यर्थं नियतं प्रयासबाहुल्यम्। प्रयासेनानेनैव इतरप्राणिभ्यस्तेषां स्वातन्त्र्यमवलोक्यते। ननु को नाम पुरुषार्थ इति चेदुच्यते पुरुषाणामर्थः पुरुषार्थः पुरुषप्रयोजनं वा। चत्वारो हि पुरुषार्था धर्मार्थकाममोक्षाः। पुरुषार्थचतुष्टयमध्ये उत्तरोत्तरस्य प्रकर्षाधिक्यं बोध्यम्। तत्र काममोक्षयोः सुखस्वरूपत्वात् प्रार्थनाविषयत्वम्। धर्मार्थयोस्तु सुखसाधनत्वात् प्रार्थनाविषयत्वं, न तु स्वरूपतः। अत एव काममोक्षयोः प्रकृष्टत्वम्। तत्रापि च मोक्षस्य प्रकृष्टतरत्वम्। यतः कामे दुःखसंभिन्नं सुखं मोक्षे तु दुःखासंभिन्नमिति विशेषः। सुखसाधनत्वेन प्रार्थ्यमानयोः धर्मार्थयोर्मध्ये चार्थः सुखस्य सन्निकृष्टः, धर्मस्तु विप्रकृष्ट इत्यर्थस्य प्रकर्षः। अतोऽर्थापेक्षया धर्मस्य प्राङ् निर्देशोऽवगन्तव्यः। तत्र धर्मप्रतिपादकं शास्त्रं धर्मशास्त्रं मनुसंहितादि। अर्थप्रतिपादकं शास्त्रमर्थशास्त्रं कौटिल्यप्रणीतादि। कामप्रतिपादकं शास्त्रं कामशास्त्रं वात्स्यायनप्रणीतादि। मोक्षप्रतिपादकं शास्त्रं मोक्षशास्त्रं दर्शनशास्त्रादि। तेन एतज्ज्ञायते यन्मोक्षशास्त्रमेव दर्शनशास्त्रम्। तत्र दृश्यते साक्षात्क्रियते परमतत्त्वमनेन इति व्युत्पत्त्या ‘दृशिर् प्रेक्षणे’ इति भ्वादिगणीयाद् दृश्-धातोः करणे ल्युटि दर्शनशब्दो निष्पद्यते। तेन आत्मसाक्षात्कारोपायप्रतिपादकं हि दर्शनम्। स्वप्रतिपादकत्वसम्बन्धेन च दर्शनपदेन दर्शनशास्त्रमेव लक्षितम्। दृश्यन्ते हि दर्शनानां सूक्ष्मातिसूक्ष्मधीगोचरसिद्धान्तास्तैस्तैः दार्शनिकैः स्वीयदर्शनग्रन्थेषूपनिबद्धाः। स्वसिद्धान्तप्रतिपादनवेलायां च दार्शनिकैः सिद्धान्तप्रतिपादनोपयोगीनि प्रत्यययुतपदसमुच्चयरूपाणि समासबद्धानि बहूनि वाक्यानि व्यवहृतानि। ममायं प्रबन्धस्तावत् न्यायत्रिसूत्र्यां समासप्रत्ययार्थघटितसिद्धान्ता इति। समासाश्च प्रत्ययाश्च समासप्रत्ययाः। तेषामर्थाः समासप्रत्ययार्थाः। तैः घटितः समासप्रत्ययार्थघटितः। समासप्रत्ययार्थघटिताश्चामी सिद्धान्ताश्चेति समासप्रत्ययार्थघटितसिद्धान्ताः। ननु का नाम न्यायत्रिसूत्री इति चेदुच्यते, महर्षिगौतमप्रणीतस्य न्यायशास्त्रस्यादितः सूत्रत्रयम् –

१. प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः।
२. दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः।
३. प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि।

एतानि त्रीणि सूत्राणि साकल्येन त्रिसूत्री इति कथ्यते। दृश्यते च प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि इति सूत्रभाष्यस्यान्तिमे ‘इति त्रिसूत्रीभाष्यम्’[i] इति। एवं न्यायत्रिसूत्रीमध्ये भाष्यमध्ये च सिद्धान्तप्रतिपादनसमये समासाः प्रत्ययाश्च कथमुपकुर्वन्ति, कथं च तेषामुपयोगः कृतो दार्शनिकैः इत्येतेषामालोचनमत्र यथामति विधीयते –

- **प्रथमसूत्रम्**

प्रयोजनमनभिसन्धाय प्रेक्षावन्तो न प्रवर्तन्ते इत्यतो भगवताक्षपादेन प्रथमं सूत्रमवतारितं –

**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** **ISSN: 2581-6241** **Volume - 4, Issue - 1, Jan – 2021**
**Monthly, Peer-Reviewed, Refereed, Indexed Journal** **Impact Factor: 3.589**
**Received on : 13/01/2021** **Accepted on : 26/01/2021** **Publication Date: 31/01/2021**

“प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः”[ii] इति।

प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानमेव निःश्रेयसकारणमिति सूत्रस्य सरलार्थः। पदत्रयात्मकेऽस्मिन् प्रथमे सूत्रे प्रमाणादिरूपकं पदं किंविधसमासनिष्पन्नमिति विचार्यम्। तथाह्यत्र बहुव्रीहिसमासो भवितुं नार्हति, तस्य अन्यपदार्थप्रधानत्वाद् अनिष्टापत्तेः। एवं कर्मधारयोऽपि न युक्तः। षष्ठीतत्पुरुषस्य चोत्तरपदप्राधान्यात् निग्रहस्थानानामेव प्राधान्यलाभे तज्ज्ञानादेव निःश्रेयसाधिगमः स्यादित्यनिष्टापत्तेः षष्ठीतत्पुरुषसमासोऽपि न ग्राह्यः। प्रमाणादीनां षोडशानामेव पदार्थानां तत्त्वज्ञानात् निःश्रेयसलाभो भवतीत्यर्थस्फुटीकरणाय द्वन्द्वसमास एव समाश्रयणीयः, तस्य च सर्वपदार्थप्रधानत्वात्। अत उच्यते वार्तिककारेणोद्यतकरेण – “सर्वे एते प्रमाणादयो विज्ञेया इति, अन्यथा हि समासान्तरपरिग्रहाद्विशेषणोपयुक्तानां प्रमाणादीनामविज्ञेयता स्यात्”[iii] इति।

ननु समस्यमानपदार्थेषु भेदः स्याच्चेद् द्वन्द्वः सम्भवति, अभेदस्थले च द्वन्द्वोऽसम्भवः। प्रमाणादयः पदार्थाश्च प्रमेयत्वेनाभिन्नाः, तत्कथमस्मिन् अभेदस्थले द्वन्द्वप्राप्तिरिति चेदुच्यते न्यायसूत्रवृत्तिकारेण विश्वनाथेन – “तथापि पदार्थतावच्छेदकभेदादेव द्वन्द्व इति न दोषः”[iv] इति। तथाहि प्रमाणं नाम प्रमितिकरणम्। तन्निष्ठा या पदार्थता तस्या अवच्छेदकं भवति प्रमितिकरणत्वम्। एवं प्रमेयपदार्थतावच्छेदकं भवति प्रमितिविषयत्वम्। इत्थं प्रमेयत्वेन अभिन्ना अपि ते पदार्थाः पदार्थतावच्छेदकभेदाद् भिन्ना इत्यतो भेदस्थले द्वन्द्वसमासविधाने न कापि अनुपपत्तिः।

ननु घटः, घटः, घट इत्यत्र एकशेषेण घटा इति पदं निष्पद्यते। एकशेषो हि द्वन्द्वापवादः। उत्सर्गं द्वन्द्वं प्रबाध्य अपवादः प्रवर्तते। यदि पदार्थतावच्छेदकभेदो हि द्वन्द्वनियामकस्तर्हि घटः, घटः, घट इत्यत्र पदार्थतावच्छेदकभेदाभावात् कथं द्वन्द्वप्राप्तिः? कथं च अप्राप्तं द्वन्द्वं प्रबाध्य एकशेषः प्रवर्तते? न च घटा इत्यत्र बहुत्वबोधो घटपदोत्तरवर्तिजस्-विभक्त्या भवतीति न प्रयोजनं स्वरूपैकशेषेण इति वाच्यं, सकृदुच्चरितः शब्दः सकृदेवार्थं गमयतीति नियमात् एकघटपदेन बहुघटबोधासम्भवात् जस्-प्रयोज्यबहुत्वसंख्याया अपि बाधाच्च। अतः स्वरूपैकशेष एव स्वीकार्यः। तर्हि द्वन्द्वप्राप्तिः कथमिति चेन्न पदार्थतावच्छेदकभेदवत् पदार्थभेदस्यापि द्वन्द्वनियामकत्वाभ्युपगमात्। तथाहि घटाः इत्यत्र ‘एतद्घटो न तद्घटः’, ‘तद्घटो न अमुकघट’ इत्येवं पदार्थभेदे सति द्वन्द्वः प्रवर्तते, ततश्च तं प्रबाध्य एकशेषः प्राप्नोतीति न कापि अनुपपत्तिः। ननु क्वचित् पदार्थभेदः क्वचिच्च पदार्थतावच्छेदकभेदो द्वन्द्वनियामक इत्यननुगम इति चेन्न, पदजन्यप्रतिपत्तिविषयत्वस्यैव द्वन्द्वनियामकत्वनियमात्। पदजन्यप्रतिपत्तिविषयत्वं च उभयत्रैव अनुगतम्। तथाहि अहिनकुलमिति पदार्थभेदस्थले अहिपदोपस्थाप्याहिपदार्थ-नकुलपदोपस्थाप्यनकुलपदार्थयोः भेदः प्रतीयते, तत्र च पदजन्यप्रतिपत्तिविषयत्वमपि वर्तते। एवं प्रमाणप्रमेयेत्यादिसूत्रे पदार्थतावच्छेदकभेदस्थले प्रमितिकरणत्वप्रमितिविषयत्वादिषु यो भेदो वर्तते तत्रापि पदजन्यप्रतिपत्ति विषयत्वमक्षतमेवेति नानुपपन्नम्।

एवं द्वन्द्वसमासनिष्पन्नस्य प्रमेयादिरूपकपदस्य भाष्यानुसारि विग्रहवाक्यं तावत् - प्रमाणानि च प्रमेयं च संशयश्च प्रयोजनं च दृष्टान्तश्च सिद्धान्तश्च अवयवाश्च तर्कश्च निर्णयश्च वादश्च जल्पश्च वितण्डा च हेत्वाभासाश्च छलं च जातयश्च निग्रहस्थानानि चेति, ‘निर्देशे यथावचनं विग्रह’[v] इत्युक्तत्वात्। परन्तु भाष्योक्तनिर्देशपदेन किं बोध्यं - लक्षणसूत्रम् उत विभागसूत्रम् आहोस्विद् उभयम्। नान्त्यः, निग्रहस्थानपदार्थस्य लक्षणसूत्रे एकवचनदर्शनात् विभागसूत्रे तददर्शनाद् अनिष्टापत्तेः। न मध्यमः, तर्कपदार्थस्य विभागसूत्राभावात्। नापि प्रथमः, जातिनिग्रहस्थानयोः लक्षणसूत्रे एकवचने प्रयुक्तेऽपि भाष्यप्रदर्शिते विग्रहवाक्ये बहुवचनदर्शनात्। अत एव समाधिर्विहित उदयनाचार्येण – “भाष्यस्थवचनपदेन क्वचित् सौत्रं क्वचिदार्थं च वचनं गृह्यते”[vi] इति। परन्तु नव्याः सर्वत्र एकवचनेनैव विग्रहवाक्यं सम्पादयन्ति, प्रथमातिक्रमे मानाभावात्। तथाहि नव्यनये विग्रहवाक्यं तावत् - प्रमाणं च प्रमेयं च संशयश्च प्रयोजनं च दृष्टान्तश्च सिद्धान्तश्च अवयवश्च तर्कश्च निर्णयश्च वादश्च जल्पश्च वितण्डा च हेत्वाभासश्च छलं च जातिश्च निग्रहस्थानं चेति, न च नव्यसम्मतविग्रहे प्रमाणादीनां चतुष्ट्वं नोपपद्यते इति वाच्यम्, अग्रिमविभागसूत्रेण तत्प्रतिपादनात्। तदुच्यते न्यायसूत्रवृत्तिकारेण – “नव्यास्तु सर्वत्र प्रथमोपस्थितैकवचनेनैव विग्रहः। न ह्यत्र बहुवचनेनैव प्रमाणादीनां चतुष्ट्वं परिच्छिद्यते किन्तु अग्रिमविभागेन”[vii] इति।

किञ्च, सूत्रेऽस्मिन् तत्त्वज्ञानादिति पञ्चम्यन्तं समस्तं पदम्। निःश्रेयसाधिगम इति च प्रथमान्तं समस्तं पदम्। तत्त्वस्य ज्ञानं तत्त्वज्ञानमिति, निःश्रेयसस्याधिगमो निःश्रेयसाधिगम इति चोभयत्र षष्ठीसमासः। तत्त्वस्य ज्ञायमानत्वेन निःश्रेयसस्य च अधिगम्यमानत्वेन कर्मत्वाद् उभयत्र कर्मणि षष्ठ्यौ विहिते इति बोध्यम्। अपि च, प्रमाणादीनां तत्त्वमित्यत्र शैषिकी षष्ठी बोध्या। ननु तत्त्वप्रमाणादिपदसापेक्षत्वेनासमर्थत्वाद् असमासः प्राप्नोति, सापेक्षमसमर्थं भवतीति नियमात्। न च तत्त्वं च तज्ज्ञानं च इति तत्त्वज्ञानपदं कर्मधारयसमासनिष्पन्नमिति वाच्यं, ज्ञानस्य स्वतस्तत्त्वातत्त्वविभागाभावात्। अत ऋद्धस्य राज्ञः पुरुष इतिवद् असमास एव युक्त इति चेन्न, देवदत्तस्य गुरुकुलमितिवत् सापेक्षत्वेऽपि गमकत्वेन समासविधानादत्रापि समासः स्यादेव। किञ्च, तत्त्वं ज्ञायतेऽनेनेति व्युत्पत्त्यापि तत्त्वज्ञानपदस्य निष्पत्तिर्भवितुमर्हति। तदा तु तत्त्वज्ञानपदेन न्यायशास्त्रं बोध्यम्। निःश्रेयसं नाम मुक्तिः। निःश्रेयसे च सिद्धे पटादिवत् तत्प्राप्तये न प्रयत्नान्तरमपेक्षितमिति प्रतिपादनाय अधिगमपदमत्र प्रयुक्तं सूत्रकारेण।

न्यायभाष्यस्य प्रारम्भेऽपि भगवता वात्स्यायनेनाभाणि – “प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत्प्रमाणम्”[viii] इति। प्रमाणत इत्यत्र प्रत्ययार्थघटितः कश्चन सिद्धान्तो विद्यते। तथाहि प्रमाणत इति पदं द्विधा निष्पादयितुं शक्यम्। प्रमाणशब्दात् तसिल्प्रत्ययेन तथा तसिप्रत्ययेनापि प्रमाणत इति पदं निष्पद्यते। ननु अत्र कः प्रत्यय इष्ट इति चेद् ब्रूमः – तसिप्रत्यय एवात्र इष्ट इति। तथाहि प्रमाणशब्दात्

**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN: 2581-6241 Volume - 4, Issue - 1, Jan – 2021
Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 3.589
Received on : 13/01/2021 Accepted on : 26/01/2021 Publication Date: 31/01/2021

तसिल्प्रत्ययविधायकं सूत्रं हि "पञ्चम्यास्तसिल्"[ix] इति। तेन प्रमाणत इत्यस्य प्रमाणादित्यर्थः स्यात्। परन्तु प्रमाणशब्दात् "आद्यादिभ्यस्तसेरुपसंख्यानम्"[x] इति वार्तिकेन तसिप्रत्यये प्रमाणात् प्रमाणेन चेति हेतुत्वं करणत्वं चोभयमेव लभ्यते। न केवलं विभक्तिव्याप्तिरेव तसेरुपयोगः, वचनव्याप्तिरपि तसिना लब्धुं शक्यते। तेन प्रमाणत इति पदात् प्रमाणेन, प्रमाणाभ्यां, प्रमाणैः, प्रमाणात्, प्रमाणाभ्यां, प्रमाणेभ्यश्चेत्यादयोऽर्था लभ्यन्ते, तसेः सार्वविभक्तित्वात्। ननु अस्तु, तसिप्रत्ययेन निष्पन्नात् प्रमाणत इति पदात् हेतुत्वं करणत्वं चोभयमेव लभ्यते इति सार्थिका विभक्तिव्याप्तिः, परन्तु वचनव्याप्तिस्तावत् किंफलिका इति चेदुच्यते – वचनव्याप्त्या एतदेव सूच्यते यत् प्रमाणानि यथा प्रतिप्रमेयं व्यवतिष्ठन्ते तथा प्रमेयमभिसंप्लवन्ते अपीति। तथाहि 'अग्निहोत्रं जुहुयात् स्वर्गकाम' इत्यत्र लिङ्गदर्शनाभावात् प्रत्यक्षाभावात् अलौकिकस्य स्वर्गादेः आगम एव प्रमाणमिति प्रमाणव्यवस्था बोध्या। एवं अग्निराप्तोपदेशात्प्रतीयते अत्राग्निरिति, प्रत्यासीदता धूमदर्शनेन अनुमीयते, प्रत्यासन्नेन च प्रत्यक्षत उपलभ्यते इति प्रमाणसंकरश्च बोध्यः।

किञ्च, प्रमाणमन्तरेण अर्थप्रतिपत्तिर्न भवति, अर्थप्रतिपत्तिमन्तरेण च न प्रवृत्तिसामर्थ्यं सम्भवति। अत एवमनुमातुं शक्यं – प्रमाणमर्थवत् समर्थप्रवृत्तिजनकत्वात् इति। तत्र अर्थवदिति तद्धितान्तं पदम्। अर्थोऽस्यास्तीति विग्रहे 'तदस्यास्त्यस्मिन्निति मतुप्' इति पाणिनीयसूत्रेण मतुप्प्रत्यये प्रक्रियाकार्ये अर्थवदिति रूपं जातम्। मतुप्प्रत्ययस्य बहवोऽर्थाः सम्भवन्ति। तदुच्यते –

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने।
संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः।।[xi] इति।

अर्थवदित्यत्र च मतुपोऽर्थो नित्ययोगः। एतच्च उल्लिखितं न्यायवार्तिकतात्पर्यटीकायां वाचस्पतिमिश्रेण –

"नित्यता चाव्यभिचारिता, तेनार्थव्यभाचारीत्यर्थः। इयमेव चार्थाव्यभिचारिता प्रमाणस्य यद्देशकालान्तरावस्थान्तरा विसंवादोऽर्थस्वरूपप्रकारयोस्तदुपदर्शितयोः"[xii] इति।

अत एव यदि एतदर्थवन्नाभविष्यत् न समर्थां प्रवृत्तिमकरिष्यत् यथा प्रमाणाभास इति समर्थप्रवृत्तिजनकत्वरूपव्यतिरेकिहेतुना प्रमाणस्यार्थवत्त्वं सिद्ध्यति। तदर्थवत्त्वमेव प्रमाणस्य प्रामाण्यम्। जयन्तभट्टेनापि सिद्धान्तितं – "तस्य स्वप्रमेयाव्यभिचारित्वं नाम प्रामाण्यम्"[xiii] इति। एवं प्रथमसूत्रगतं समासप्रत्ययादिविचारणं समासेन विहितम्।

- **द्वितीयसूत्रम्**

प्रमाणादीनां षोडशानां पदार्थानां तत्त्वज्ञानमेव निःश्रेयसकारणमिति आदिमे न्यायसूत्रे प्रतिपादितम्। परन्तु तत्त्वज्ञानस्य साक्षादेव निःश्रेयसहेतुत्वं न विद्यते। निःश्रेयसं तावद् द्विविधं परापरभेदात्। तत्र अवधारितात्मतत्त्वस्य नैरन्तर्याभ्यासापहृतमिथ्याज्ञानस्य प्रारब्धं कर्मोपभुञ्जानस्य साधकस्य तत्त्वज्ञानानन्तरमेव जीवन्मुक्तिलक्षणमपरं निःश्रेयसं संघटते। परं निःश्रेयसं तु क्रमेण भवतीति क्रमप्रतिपादनाय द्वितीयं न्यायसूत्रमवतारितं भगवताक्षपादेन –

"दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः"[xiv] इति।

किञ्च, परा मुक्तिरेव न्यायशास्त्रस्य मुख्यप्रयोजनम्। प्रमाणादिषोडशपदार्थान्तर्गतस्य प्रमेयपदार्थस्य तत्त्वज्ञानमेव मिथ्याज्ञाननिवृत्तिपूर्वकं परनिःश्रेयसप्रयोजकं भवतीति मुख्यप्रयोजनस्य परीक्षणात् सूत्रमिदं परीक्षासूत्रमिति बोध्यम्। दुःखादीनां मध्ये यदुत्तरोत्तरं, तेषामपाये तदनन्तरस्य तत्सन्निहितस्य पूर्वपूर्वस्यापायादपवर्गः सिध्यतीति सूत्रस्यास्य सरलार्थः।

मिथ्याज्ञानाद्यभावानां प्रत्येकमपवर्गेण सह प्रयोज्यप्रयोजकभावसम्बन्धो विद्यते। स च प्रयोज्यप्रयोजकभावरूपसम्बन्धः स्वरूपानतिरिक्तसम्बन्धविशेषः। तथाहि तदनन्तरापायादित्यत्र पञ्चम्याः कस्तावदर्थ इति चेदुच्यते न्यायसूत्रवृत्तिकृता – "प्रयोजकत्वं प्रयोज्यत्वं वा पञ्चम्यर्थः"[xv] इति। प्रयोजकत्वपक्षे तु मिथ्याज्ञानाद्यपायनिष्ठप्रयोजकत्वनिरूपकोऽपवर्ग इति शाब्दबोधः सिध्यति। परन्तु स्वनिरूपकत्वसम्बन्धस्य वृत्त्यनियामकत्वात् अभावप्रतियोगितावच्छेदकत्वं नास्ति। तथाहि विचारितं गदाधरभट्टाचार्येण व्युत्पत्तिवादग्रन्थे – "मैवं, राज्ञः पुरुष इत्यादौ षष्ठ्यादेः स्वत्वादिवाचकत्वमावश्यकमन्यथा पुरुषो न राज्ञ इत्यादौ पुरुषे राजस्वत्वाद्यभावबोधानुपपत्तेः। न हि तत्र स्वत्वादिसम्बन्धावच्छिन्नप्रतियोगिताकराजाद्यभाव एव प्रतीयते न तु राजस्वत्वाद्यभाव इति सम्भवति – स्वत्वादिसम्बन्धस्य वृत्त्यनियामकतया प्रतियोगितानवच्छेदकत्वेन तत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावाप्रसिद्धेः"[xvi] इति। अत एव प्रयोजकत्वरूपमर्थं विहाय प्रयोज्यत्वरूपः पञ्चम्यर्थः स्वीकार्यः। तेन च मिथ्याज्ञानाद्यपायनिरूपितप्रयोज्यत्वाश्रयोऽपवर्ग इति शाब्दबोधः सिध्यति। स्वाश्रयत्वसम्बन्धस्य वृत्तिनियामकत्वात् अभावप्रतियोगितावच्छेदकत्वमपि संगच्छते, अतो न कापि अनुपपत्तिः। एवं तत्त्वज्ञानान्मिथ्याज्ञानमपैति, मिथ्याज्ञानापायाद् दोषा अपयन्ति, दोषापायात् प्रवृत्तिरपैति, प्रवृत्त्यपायात् जन्मापैति, जन्मापायाद् दुःखमपैति, दुःखापायादपवर्गः सिद्ध्यतीत्यवगन्तव्यम्। एवं 'तदनन्तरापायात्' इत्यत्र पञ्चम्याः प्रयोज्यत्वरूपार्थकरणेन उपर्युक्तेषु 'तत्त्वज्ञानान्मिथ्याज्ञानमपैति' इत्याद्यवान्तरवाक्यषट्सु तत्त्वज्ञानादिपदेषु पञ्चम्याः प्रयोज्यत्वरूपोऽर्थः करणीयः। परन्तु 'दुःखापायादपवर्गः' इत्यत्र पञ्चम्याः प्रयोज्यत्वरूपोऽर्थो न करणीयः। दुःखापाय एव अपवर्गः, न तु दुःखापायनिरूपितप्रयोज्यत्वाश्रयो भवत्यपवर्गः। अतो 'दुःखापायाद् अपवर्गः' इत्यत्र पञ्चम्या अभेदार्थकत्वमङ्गीकार्यं, तेन च दुःखापायाभिन्नोऽपवर्ग इत्यर्थो लभ्यते। ननु

**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN: 2581-6241 Volume - 4, Issue - 1, Jan – 2021
Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 3.589
Received on : 13/01/2021 Accepted on : 26/01/2021 Publication Date: 31/01/2021

समानविभक्तिकस्थले एव अभेदान्वयबोधः सुप्रसिद्धः। क्वचिच्च 'धान्येन धनवान्' इत्यादौ तृतीयाया अपि अभेदार्थकत्वं दृश्यते। परन्तु पञ्चम्या अभेदार्थकत्वं कुत्रापि न दृष्टं, तत्तु सर्वथा अप्रसिद्धमिति विचिन्त्य कैश्चित् पुनः पञ्चम्या अभेदार्थकत्वं नाङ्गीकृतम्, अपि तु प्रयोज्यत्वरूपोऽर्थ एव गृहीतः। न च दुःखापायनिरूपितप्रयोज्यत्वाश्रयोऽपवर्ग इति तेषां मतेऽनिष्टापत्तिरिति वाच्यं, अपवर्गशब्दस्य अपवर्गप्राप्तिरूपलाक्षणिकार्थस्य तैर्ग्रहणात्। तेन च 'दुःखापायाद् अपवर्गः' इत्यस्य दुःखापायनिरूपितप्रयोज्यत्वाश्रया भवति अपवर्गप्राप्तिरित्यर्थो लभ्यते। दुःखापायादपवर्गप्राप्तिर्भवतीति च तदर्थः, तेन च न काप्यनुपपत्तिः। परन्तु अपवर्गप्राप्तये प्रयत्नान्तरं नापेक्षितमिति मत्वा प्रथमसूत्रव्याख्यानकाले न्यायसूत्रवृत्तिकृता विश्वनाथेन - 'अत्र च निःश्रेयसे सिद्धे पटादिवत् तत्प्राप्तये न प्रयत्नान्तरमपेक्षितमिति प्रतिपादनायाधिगमपदम्'[xvii] इत्युक्त्वा अपवर्गपदस्य अपवर्गप्राप्तिरूपार्थविषयकं प्रागुक्तमतमनादृतम्। प्रतिपादितं च तेन मतान्तरम् - 'अपवर्गपदं वा तद्व्यवहारपरम्' इति। अत्र व्यवहारो नाम शब्दप्रयोगः। तेन 'दुःखापायाद् अपवर्ग' इत्यस्य दुःखापायनिरूपितप्रयोज्यत्वाश्रयः अपवर्ग इति व्यवहार इत्यर्थः समायाति। समायातश्च पञ्चम्याः प्रयोज्यत्वरूपप्रसिद्धोऽर्थ इति बोद्धव्यम्।

- **तृतीयसूत्रम्**

प्रमाणादीनां षोडशानां पदार्थानां तत्त्वज्ञानं निःश्रेयसकारणम्। अत्र यद्यपि मोक्षजनकज्ञानविषयत्वेन प्रमेयमेवादौ निरूपयितुमर्हं, तथापि प्रमाणस्य सकलपदार्थव्यवस्थापकत्वेन प्राधान्यात् प्रथममुद्देशो विहितः। उद्देशो लक्षणं परीक्षा चेति शास्त्रस्य त्रिधा प्रवृत्तिः। तत्र यथोद्देशं लक्षणस्यापेक्षितत्वात् प्रथमोद्दिष्टस्य प्रमाणस्य स्वरूपं निरूपितं गौतमेन – "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि"[xviii] इति सूत्रेण। वस्तुतस्तु सूत्रेणानेन प्रमाणस्य लक्षणं तथा विभागमपि कृतवान् ग्रन्थकारः। अत उक्तं जयन्तभट्टेन –

एकेनानेन सूत्रेण द्वयञ्चाह महामुनिः।
प्रमाणेषु चतुःसंख्यं तथा सामान्यलक्षणम्॥[xix] इति।

ननु किं तावत् प्रमाणस्य सामान्यलक्षणमिति चेदुच्यते प्रमाकरणत्वमेव प्रमाणत्वमिति। तथाहि प्रमीयतेऽनेनेत्यर्थे प्रोपसृष्टात् माधातोः करणे ल्युटि प्रमाणशब्दो निष्पन्नो भवति। अत्र प्रकर्षद्योतकेन प्रेत्युपसर्गेण तद्वति तत्प्रकारकत्वरूपप्रकर्षो द्योतितो भवति। तद्वति तत्प्रकारकत्वरूपप्रकर्षविशिष्टज्ञानं भवति प्रमा। किञ्च, ज्ञानं द्विविधं स्मृतिरनुभवश्च। अत्र च ज्ञानपदेन अनुभवो विवक्षितः। उक्तं च न्यायकुसुमाञ्जलिग्रन्थे –

यथार्थानुभवो मानमनपेक्षतयेष्यते[xx] इति।

स्मृतेश्च अनुभवसापेक्षत्वेन प्रमात्वं नास्ति। अतः स्मृतिकरणं न प्रमाणम्, अपि तु यथार्थानुभवरूपप्रमाकरणं भवति प्रमाणम्। सूत्रकारो गौतमोऽपि 'प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्' इति साध्यसाधनमुपाददानः प्रमाणलक्षणं सूचितवान् – साध्यसाधनस्य प्रमाकरणस्य प्रमाणत्वम् इति। भाष्यकारेण चोक्तम् – "उपलब्धिसाधनानि प्रमाणानीति समाख्यानिर्वचनसामर्थ्याद् बोद्धव्यम्। प्रमीयतेऽनेनेति करणार्थाभिधानो हि प्रमाणशब्दः"[xxi] इति।

ननु न चत्वारि प्रमाणानि इति संख्यावचनः शब्दः श्रूयते, नापि प्रत्यक्षादीन्येव इत्यवधारणश्रुतिरस्ति। तत्कुतः इयत्तानियमावगमः स्यादिति चेदुच्यते शब्दशक्तिस्वभावादेव इति। यथा यज्ञदत्तदेवदत्तौ आनय इति विनापि संख्याशब्दमेवकारञ्च भवत्येव द्वित्वनियमावगमः, तथैव अत्रापि प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि इत्युक्ते सामर्थ्यात् न्यूनाधिकसंख्याव्यवच्छेदोऽवधार्यते इति बोध्यम्। तेन प्रत्यक्षम्, अनुमानम्, उपमानं, शब्दश्चेति चत्वारि एव प्रमाणानि न्यायसम्मतानि इति लभ्यते। चतुर्षु प्रमाणेषु सर्ववादिसम्मतत्वात् ज्येष्ठत्वाच्च प्रमाणस्य प्रथममुल्लेखः। प्रत्यक्षस्वरूपं निरूपितं भाष्ये – "अक्षस्याक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षम्। वृत्तिस्तु सन्निकर्षो ज्ञानं वा"[xxii] इति।

तथाहि अक्षं नाम इन्द्रियम्। अक्षमक्षं प्रति वर्तते इति विग्रहे अव्ययीभावसमासेन प्रत्यक्षशब्दस्य निष्पत्तिर्भवति। भाष्ये तु विग्रहवाक्यस्य अर्थः परिष्कृतो वर्तते, न साक्षाद् विग्रहवाक्यमिति बोध्यम्। वार्तिककारस्तु अव्ययीभावं परित्यज्य प्रादिसमासेन निष्पत्तिं प्रदर्शितवान् – प्रतिगतमक्षं प्रत्यक्षमिति। प्रादितत्पुरुषस्य चोत्तरपदप्राधान्यात् अक्षशब्दस्य प्राधान्यलाभे सति प्रत्यक्षशब्दस्य इन्द्रियवाचकत्वमुपलभ्यते। किञ्च, विषयसम्बन्धानि एव इन्द्रियाणि ज्ञानं जनयन्ति। तत्रापि च वर्तते सम्बन्धापेक्षा। स च सम्बन्धः सन्निकर्षरूपः। सन्निकर्षश्च षट्प्रकारकः – संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति। एवमिन्द्रियार्थसन्निकर्षजन्यं ज्ञानं भवति प्रत्यक्षं, तत्करणं च प्रत्यक्षप्रमाणं, तदपि च प्रत्यक्षशब्देन व्यपदेश्यम्।

अनुमानप्रमाणविषये भाष्यकारेणोक्तं – "मितेन लिङ्गेन लिङ्गिनोऽर्थस्य पश्चान्मानमनुमानम्"[xxiii] इति। अनुमीयतेऽनेनेत्यनुमानम्। अनुमितिकरणं भवत्यनुमानम्। व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानं भवत्यनुमितिः। तत्करणं च व्याप्तिविशिष्टपक्षधर्मताज्ञानम्। स एव परामर्शः। नव्यास्तु व्याप्तिज्ञानमेव अनुमानप्रमाणमिति स्वीकुर्वन्ति, व्यापारवत्कारणस्यैव करणत्वाभ्युपगमात्।

उपमितिकरणं भवत्युपमानम्। संज्ञासंज्ञिसम्बन्धज्ञानं हि उपमितिः। यथा कश्चिद् गवयशब्दवाच्यमजानन् कुतश्चिदारण्यकपुरुषाद् गोसदृशो गवय इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन् गोसदृशं पिण्डं पश्यति। तदनन्तरमयं गवयपदवाच्यः पिण्ड इति संज्ञासंज्ञिसम्बन्धप्रतीतिरुपमितिरुत्पद्यते। अत्र च अतिदेशवाक्यार्थज्ञानं करणमित्यामनन्ति प्राचीनाः। नव्यास्तु सादृश्यज्ञानमेव

उपमानप्रमाणत्वेन स्वीकुर्वन्ति। भाष्यकारेणापि मतमिदं समर्थयतोक्तम् – "उपमानं सारूप्यज्ञानम्"[xxiv] इति। सारूप्यं चात्र सादृश्यमिति बोध्यम्।

चतुर्षु प्रमाणेषु अन्तिमं तावच्छब्दः। शब्द्यते अभिधीयते ज्ञाप्यते अर्थोऽनेनेति शब्दः। तेन शाब्दबोधकरणं भवति शब्दप्रमाणम्। प्राचां मते स शब्दः आप्तोपदेशरूपः। तथाहि सूत्रितम् – "आप्तोपदेशः शब्दः"[xxv] इति। नव्यास्तु पदज्ञानमेव करणमिति अङ्गीकुर्वन्ति। एवं तृतीयसूत्रगतं समासप्रत्ययादिविचारणं संक्षेपेण कृतम्।

## २ उपसंहृतिः

प्रबन्धेऽस्मिन् न्यायदर्शनस्य आदितः सूत्रत्रयस्य प्रमुखाः सिद्धान्ताः समालोचिताः। तत्रापि विशेषो यत्, सिद्धान्तप्रतिपादनसमये मुख्यतः सामासिकी प्रात्ययिकी च दृष्टिः समाश्रिता। समासार्थाः प्रत्ययार्थाश्च न्यायशास्त्रस्य एतत्सूत्रत्रयस्य सिद्धान्तख्यापने कथमुपयोगिनो भवन्तीति प्रतिपादितं वर्तते। आदौ प्रथमसूत्रे एव द्वन्द्वसमासः कथं प्राप्नोति, कश्च तदर्थ इति विचारितम्। ततश्च प्रथामायां भाष्यपङ्क्तौ विद्यमानानां प्रत्ययानामर्था विचारिताः। एवमेव द्वितीये सूत्रे विशेषतः तदनन्तरापायाद् इत्यत्र पञ्चम्याः कीदृशोऽर्थो ग्राह्य इति वृत्तिकारमतमुद्धृत्य प्रतिपादितम्। ततश्च तृतीये सूत्रे प्रत्येकं पदानां व्युत्पत्तिप्रदर्शनपूर्वकं प्रत्ययार्थघटितराद्धान्ताः समालोचिता इति शिवम्।

---

**तथ्यसूत्राणि :**

[i] न्यायभाष्यम् - तृतीयसूत्रव्याख्यानादनन्तरं भाष्यकारेण तथोक्तम्

[ii] न्यायसूत्रम् - १/१/१

[iii] न्यायवार्तिकम्

[iv] न्यायसूत्रवत्तिः, सेख-साविर-आलिसम्पादिता, पृष्ठा - ६

[v] न्यायभाष्यम्, फणिभूषण-तर्कवागीशेन सम्पादितम्, पृष्ठा - १९

[vi] न्यायवार्तिकतात्पर्यपरिशुद्धिः

[vii] न्यायसूत्रवृत्तिः, ... न ह्यत्र बहुवचनेन प्रमाणादीनां चतुष्ट्वं परिच्छिद्यते किन्तु अग्रिमविभागेन, न ह्येकद्वित्रिधवखदिरादौ धवश्च खदिरश्च पलाशश्चेति न विगृह्यते। अत एव प्रयोजनस्यैकवचनान्तत्वे तद्विभागाकरणेऽपि सुखदुःखाभावतत्साधनभेदेन तस्य बहुत्वं न विरुद्ध्यते इति प्राहुः।

[viii] न्यायभाष्यम्, न्यायभाष्यस्यादिमा पङ्क्तिः।

[ix] अष्टाध्यायी - ४/३/१७

[x] वार्तिकम्

[xi] सिद्धान्तकौमुदी, तद्धितप्रकरणे सम्प्राप्तोऽयं श्लोकः।

[xii] न्यायवार्तिकतात्पर्यटीका

[xiii] न्यायमञ्जरी

[xiv] न्यायसूत्रम् – १/१/२

[xv] न्यायसूत्रवृत्तिः, सेख-साविर-आलिसम्पादिता, पृष्ठा - ४७

[xvi] व्युत्पत्तिवादः

[xvii] न्यायसूत्रवृत्तिः, सेख-साविर-आलिसम्पादिता, पृष्ठा - १५

[xviii] न्यायसूत्रम् – १/१/३

[xix] न्यायमञ्जरी

[xx] न्यायकुसुमाञ्जलिः – ४.१

[xxi] न्यायदर्शनम्, ढुण्डिराजशास्त्रिसम्पादितम्, पृष्ठा - २४

[xxii] तदेव, पृष्ठा - २३

[xxiii] तदेव, पृष्ठा - २४

[xxiv] तदेव,

[xxv] तदेव,

**सहायकग्रन्थाः**

गौतम, *न्यायदर्शन,* सम्पा.- फणिभूषणतर्कवागीश, कोलकाता : पश्चिमवङ्ग-राज्य-पुस्तक-पर्षत्, २०१८

पाणिनि, *अष्टाध्यायी,* सम्पा.- श्रीगोपालदत्तपाण्डेय, वाराणसी : चौखम्बा-सुरभारती-प्रकाशन, २०१६

भट्टोजिदीक्षित, *वैयाकरणसिद्धान्तकौमुदी,* सम्पा.- गिरिधरशर्मा तथा परमेश्वरानन्दशर्मा, दिल्ली : मोतीलाल बनारसीदास, २००८

वरदाचार्य, *लघुसिद्धान्तकौमुदी भैमीव्याख्या(पञ्चमो भागः)* सम्पा.- भीमसेनशास्त्री, दिल्ली : भैमी प्रकाशन, २०१८

वाचस्पति, *न्यायवार्तिकतात्पर्यटीका,* सम्पा.- राजेश्वरशास्त्री द्रविड, वाराणसी : चौखम्भा संस्कृत संस्थान, १९९०

विश्वनाथ, २०१५ *न्यायसूत्रवृत्तिः,* सम्पा.- सेख-साविर-आलि, कोलकाता : संस्कृत-पुस्तक-भाण्डार, २०१५